मू० ॥

॥ अथसप्तचंडीकाप्रारंभ ॥

श्रीगणेशायनमः॥आस्कामंबिष्णुतरजठरंवेदस्तान्दधानंबिभ्राणंमौलिदेशेहिमकरश
कलंसकुंभं॥बलेंद्राद्यैःसमस्तैरमरपरिवृढैःसेवितंशुभ्रदंतंनौमीड्यंप्रसन्नंसकलसु
नकरंतन्नेहगजास्यं॥१॥उदितदिवाकरदेहापुरहरवामांगकलगेहा॥परिपुरितनक्तहा
सन्नेहांशेलजांवंदे॥२॥पीयूषांशुकलांमनोज्ञमुकुटांशेवालतुल्यालकांबालश्रीविजि॰
ताष्टमीशशधरांनीलारविंदेक्षणां॥चापंबाणगुणंकुशान्मृदुतरैःसंबिभ्रतीबाहुभिःप्रय
गंसुमनोरमामरगणैर्भांवंदेगौरींद्रात्मजां॥३॥कालिंदीकलकूलकेलिकलनानंदाकुलैः
सतंसंकीर्तशिशुवृंदकैर्मुनिवरैर्गीतंगुणैःकालयं॥लीलासादितविश्वविश्वभयदाशेषा
पानीकंकंसंसरिकमहाद्रुमस्यसहिरंकंदमुकुंदंभजे॥४॥मुरलीरवरंजितविश्वजनस्तनु
भाविजितोनमनव्यघनः॥चलदृक्पलांनिचयेनवृतस्तनुतांममशर्ममुकुंदहितः॥५॥
फुल्लंतिवारिजगणाविहरंतिकोकाःकामंचरंतिविहगाःसकुलासुदिक्षु॥शिष्याःप

वंतिचनवंतिशुभानिलोकेयस्योदयेतमहमाशुरविंनमामि॥६॥यंपंगुसारथिरथोरथ
मेकचक्रमारूढतत्रविचियोज्यचसप्तसप्तीन्॥लोकत्रयेप्यतिविचित्रचरित्रकारीभानुस्स
मानुनिरोममपातुदेहं॥७॥योयोगिनामेपिमनश्चपत्नीचकारपुष्पेषुभिर्व्यथयंतिस्म
यंवीयसोयः॥तंमंक्षुनेत्रशिखिनाशमयंचकारमारंतमहंशुभमामिभ
क्त्या॥८॥बलच्चरणताडितक्षितितलेसुपर्वापगोच्छलज्जलनतांवरंत्रमितभीम
नेत्रत्रयं॥जटापटलनेदितोपस्वरांबुजंकधूर्जटिस्तनोतुपदतांडवंममनवंतवंमंग
लं॥अथआसीद्गगमशास्त्रकीरवसतेःस्वयंजरेः सज्जनव्यूहानंदकरःकलानिधिक
लानाल्लश्रियकिंकरः॥नानाशास्त्रविचारचारुकवितासंदोहविस्तारिलप्रावस्तो
मपरिष्टुतोबुधवरोश्रीश्रीनिवासःकृती॥१०॥आसीद्शेषनरपालविशालभाल
जालप्रभाजितमनोरमयस्ययोजःसर्वागमांबुनिधिमंथनमेदसाद्रिःश्रीश्रीनिवासत

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नयस्तुजगन्निसः॥११॥तन्नंदनाः सुकृतिनः करुणार्द्रचित्ताः शैलेंद्रजाचरणपंकजचंचरी
काः॥ज्येष्ठः शिरोमणिरितिप्रथितः कनिष्ठस्तस्माज्जनुर्दनइतिक्षितिपालिः॥१२॥जनार्दना
भिधस्तेषुयथामतिकुतूहलात्॥तांत्रिकालजबोधायकुरुतेमंत्रचंद्रिकां॥१३॥मंत्राणियानिदि
शिदार्चनचंद्रिकायांश्रीश्रीनिवासकृतिनाप्रकटीकृतानि॥सर्वाणितानिमुनिचिंतनयुक्तषडं
गयुक्तान्प्रविस्तरतयेहवदामिसाधु॥१४॥आदौगणपतिमंत्राशिवायास्मदनंतरं॥ततःकेशस्थ
सूर्यस्यशंभोश्चोक्तायथाक्रमं॥१५॥अथक्रमेणगणेशादीन्स्मृत्वातेषांमंत्रामंत्रभेदाश्चलि
ख्यंतेतत्रादौकाक्षरोगणेशमंत्रः॥पंचांतकंशशिधरंबीजंगणपतेर्विदुः॥पंचांतकंगकारःशशि
धरंबिंदुयुतं॥गं॥वेदलक्षंजपेन्मंत्रंदशांशंजुहुयात्ततः॥गंहृत्तिगणेशमंत्रेणप्राणायामन्य
सेत्॥शिरसिगणकायनमः॥मुखेविघ्नच्छेदसेहृदयेॐविघ्नेश्वरायहृदयायै॥गुह्ये
बलबीजाय॥पादयोः॥मायाशक्तयेपुनर्गुह्येपरमात्मबीजाय॥पादयोःबुद्धिशक्त्यै॥पुन

र्गुह्येउदानायबीजायपादयोः॥कुंडलिनीशक्तयेपुनर्गुह्येव्यानकायबीजाय॥तत्रैवबिंदुशक्त्यै॥
नानोनादकलात्मनेनमः॥इतिविन्यस्यममसर्वाभिष्टसिध्यर्थेविनियोगः॥इतिकृतांजलि
रुक्त्वामूलेनकरशुद्धिंकृत्वा॥अंगुष्ठयोःगणंजपायस्वाहाहृदयायनमः॥तर्जन्योःएकदंष्ट्राय
हुंफट्॥शिरसेस्वाहा॥मध्यमयोः॥अचलत्रुटिनेनमः॥शिखायैवषट्॥अनामिकयोः॥गजव
क्त्रायनमोनमः॥कवचायहुं॥कनिष्ठयोः॥महोदरायवंडायहुंफट्॥अस्त्रायफट्॥इतिमंत्रानंगुष्ठा
दिकनिष्ठिकांतंकरयोर्विन्यस्यनेत्रवर्जंस्यहृदा॥पंचांगोष्वपिन्यसेत्॥अथगांगींगूंगैं
षट्दीर्घबीजाबीजेनैवकरषडंगंन्यासंकुर्यात्॥अथध्यानं॥रक्तोरक्तांगरागांशुककुसुम
युतस्तुंदिलश्चंद्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणोबीजपूरंतनासः॥हस्ताग्रा
कृसपाशंकुशरदवरदोनागवक्त्रोहिभूषोरेवःपद्मासनोनवतुनवसुरोभूतयेविघ्न
राजः॥वामाध्वरुंयोराचेतदाघघःस्थेयोरन्यहस्तायुधध्यानं॥इतिध्यानंविधायपथा

शक्तिजपंकृत्वाजपानंतरंपुनःषडंगंविधायगुह्यातिगुह्यगोप्त्रेत्यंगुष्ठाभ्यांनमःइत्यस्त्रायफट्
सिद्धिर्भवतुमेदेवत्वत्प्रसादात्वयिस्थितेतिजपंकरस्थोदकेनसमर्पयेत्।इत्यक्षरगणेशषडंगध्यानविधिः।अस्येवमंत्रस्यान्येषडुद्धाराः।गंगःगौंगःगैंगःग्लौंगःगौंः।एतेषुग्लौंगौंः।इतिबीजद्वयस्य।गणकोमुनिरुष्णिक्छंदःस्योनिःचृच्छन्दश्चदेवता।बालोगणपतिःसर्वसुरासुरनमस्कृतः।स्वेनषड्दीर्घयुक्तेनषडंगानिप्रकल्पयेत्।अत्रापिग्लांग्लींमित्यादिद्वितीयेकांगींमित्यादिकरषडंगंन्यासोज्ञेयः।ध्यानंजापोपचंस्यादस्यपूर्ववदेवतु।एवंसंभूयमेवैकाक्षरोमंत्रः।समविधः।अथचिंतामणेशमंत्रः।षड्विंशत्यक्षरात्मकः।क्लींविरिंविरिंगणपतिवरवरदसर्वलोकंमेवशमानयस्वाहा।इतिमंत्रेणप्राणायामत्रयंकृत्वाशिरस्मिगणकायऋषयेनमः।मुखेगायत्रीछंदसेहृदिविघ्नेश्वरायदेवतायै।इतिविन्यसेष्टमीहृयेविनियोगंहस्तेतांजलिंकृत्वाक्लींविरिंचिरिंहृदयायनमः।क्लींगणपतिशिरसेस्वाहा।क्लींवरवरदशिखायैवषट्।क्लींसर्वलोकंमेकवचायहुं।क्लींवशमानयनेत्रायवौषट्।क्लींस्वाहाअस्त्रायफट्

डितिषडंगमंत्रानंगुष्ठादिकरतलांतंविन्यस्यहृदयादिच्यापन्यसेत्।अथध्यानं।सिंदूरवर्णमिभाननंत्रिनयनंहस्तेषुपाशांकुशौविघ्नाणांमधुमत्कपालमानंशस्तैर्दधानंमुदाश्लिष्टंतनुर्ध्वजायुवत्यापद्मोल्लसद्वामपार्श्वयातयोत्साहितपाणिमातमुमाप्रोल्लसदुच्चकरं॥वामोर्ध्वकरमारभ्यदक्षाधःकरपर्यंतंपाशादित्रयंवामाधःकरंदेव्यावरांगे।वामांकानिविधायादेव्यादक्षिणकरेणाश्लेषः।वामाधःकरेणध्वजाग्रंस्पृशंस्यावामदक्षिणयोःपद्ममिक्षायुधध्यानं।पुष्करेशुंडादंडः।एवंध्यात्वायथाशक्तिजपंविधायजपानंतरंपुनःषडंगंकृत्वागुह्यातिगुह्येतिपूर्वोक्तमंत्रेणजपंसमर्पयेत्।केचित्तुमंत्रमेनमेकोनविंशत्यक्षरात्मकंवदंतितन्मतेवरवरदेतिपंचवर्णःलोकमितिवर्णद्वयंतिसत्यवर्णोनवंति।अस्यापिमंत्रस्यषडंगध्यानादिकंपूर्वमंत्रवदेवाम्नायपूर्वोक्तमंत्रस्यैवमंत्रांतरस्यनोक्तस्यध्यानेविशेषः।बीजापूरगदेक्षुकार्मुकमहाचक्राब्जपाशोत्पलंविघ्नेशः करैर्दक्षैस्सलपाशमाणिकदानूरुस्था

कुंभंदधत्। सिंदूरसृणिंविद्रुमस्त्रिमनोयोन्यांतशुंजेगणस्तिलिंगाहितपाणिनंबुजकरंपुष्टिं
वहन्वोचतात्। अथवामाधःकरादिदक्षाधःकरादिचायुध्यानंकुंभस्यसर्वोर्द्धकरेयुक्त
लात्। ध्यानंषडंगादिकंपूर्ववत्। इतिचिरिंगणपतेस्त्रयोमंत्राः। अथलक्ष्मीगणेशः। श्री
गंसौम्यायमहागणपतयेवरवरदसर्वजनंमेवशमानयस्वाहा। इत्येकोनविंशाक्षरमंत्रेणप्राणा
यामत्रयंकृत्वा। शिरसिअंतर्यामिनेऋषयेनमः। मुखेनिचृद्गायत्रीछंदसेनमः। हृदये। श्रीलक्ष्मीगणेशा
यदेवतायैनमः। इतिविन्यस्याऔंश्रांगांहृदयाय। औंश्रींगांशिरसेस्वाहा। ॐश्रूंगूंशिखायैवषट्। ॐ
श्रैंगैंकवचायहुं। ॐश्रौंगौंनेत्रत्रयायवौषट्। ॐश्रः गः अस्त्रायफट्। इतिकरषडंगन्यासंविधा
यध्यानंकुर्यात्। यथाहेमाभः पीतवस्त्रःकरतलकमलेसंदधच्चक्रशंखौदंताभीतीश्चनासा
धृतकनकघटः पद्मसंस्थस्त्रिनेत्रः वामोकाविष्टलक्ष्म्याविधृतकमलयाश्लेषसद्मदो
ह्लाश्लिष्टः सौवर्णकांत्यागणपइहमहाश्रीकरोवः श्रियेस्तु। दक्षिणोर्द्धकरमारभ्यदक्षि

णांतः। वामोर्द्धकरमारभ्यवामाधःकरपर्यंतमायुधध्यानं। इतिध्यात्वाजपंकृत्वाप्रणमेत्।
इतिदशाक्षरःक्षिप्रप्रसादनमंत्रः। अथचतुरक्षरोहेरंबगणेशः॥ ॥ॐगंनमः॥ इतिमंत्रेण
प्राणायामत्रयंकृत्वा। शिरसि। ॐगंकायऋषयेनमः। मुखे। ॐगायत्रीछंदसेनमः। हृदये। ॐहेरंबायदेवतायैनमः। इतिविन्यस्यगांगीमित्यादिनाकरषडंगंन्यासंविधायध्या
नंकुर्यात्। यथा। मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तमिंदुकलाकिरीटतिलकं
नीयंशशंखंमुकुरौदस्रसिंहौहिरब्धः। हस्तैर्विभ्रतिपाशमंकुशवरौमुद्गंस्वदंतंकरै
रंकारूढमुमेशसूनुमरुणंहेरंबमेकंभजे। अधस्थवामदक्षयोर्वराभये। तदुपरिमोदकपात्रंदधौ। तदुपरिपरशुकपालौ। तदुपरिअक्षमालामुद्गरौ। तदुपरिअंकुशत्रिशूलेइतिध्यात्वाजपंकृत्वासमर्पयेत्। इतिहेरंबगणेशमंत्रः। अथसुब्रह्मण्यगणेशमंत्रः।
ॐब्रह्मतत्पुरुषायनमः। इतिसप्ताक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसि। ॐअग्नयेऋषयेनमः।
मुखे। गायत्रीछंदसे। हृदिसुब्रह्मण्यायदेवतायैनमः। इतिविन्यस्यगांगीमित्यादिनाकरषं

उंगांन्यासंविधायध्यानंकुर्यात्। यथा। पायादोरणविग्रहः शशिमुखः सम्यङ्मुखो नृजेः
पद्मंनीतिहरंरिपुक्षयकरंशक्तिंशुभंकुक्कुरं। रक्तालेपनवस्त्रदामरुचिरोनानाविभूषा
न्वितः सुब्रह्मण्यगणाधिपः शुभकरो नक्ताद्यविघ्नंसकः। दक्षायुधःकरयोराद्येतदा
युर्ध्वयोरन्येस्वायुधध्यानं। इतिध्यात्वायथाशक्तिजपंकुर्यात्तदाममर्पयेत्। अणांतश्चेदा
मंत्रेस्तदाष्टवर्णीकोनवार्णी। अणावादौशक्तिबीजंचेद्दियंतेतदान्योयमष्टाक्षरोनवार्णी।
वंत्रिविधोयंमंत्रः। इतिसुब्रह्मण्यगणेशमंत्रः। अथमहागणपतिमंत्रः। ॐश्रींह्रींक्लींग्लौं
गंगणपतयेवरदवरदसर्वजनंमेवशमानयस्वाहा इत्यष्टाविंशत्यक्षरोलक्षमंत्रेणप्राग्व
यामत्रयंकुलाशिरस्सि। ॐगणकायऋषयेनमः। मुखे। ॐनिचृद्गायत्रीछंदसे। ॐश्री
महागणपतयेदेवतायैनमः। गुह्ये ॐगंबीजायनमः। पादयो० ह्रींशक्तये। इतिविन्यस्य
ममसर्वाभीष्टसिद्धयेविनियोगः इतिकृत्वांजलिस्कृत्वा। ॐगांहृदयायनमः। ॐश्रीं

DR. BHAU DAJI
डाक्टर भाऊदाजी लाड्यस्मारकम्
MEMORIAL

ॐश्रींगांशिरसेस्वाहा। श्रीशक्तिस्मरन्लोविघ्नबीजानिगृध्रमंवदेत्। डेतंगणपतिंपश्चाद्व
रांतेवरदंवदेत्। उक्तासर्वजनंमेंतेवशमानयपदंहृदं। अष्टाविंशत्यक्षरोयंनाराद्योमनुरीरि
तः। स्मृतिस्थोमांसमौविंदुयुक्तभूबीजमारितं। स्मृतिर्गकारःसविंदुमौयुक्तं। ध्याय
न्मंत्रंजपेन्मंत्रीचतुर्लक्षंसमाहितः। चतुःसहस्रसंयुक्तंचत्वारिंशत्सहस्रकं। ॐह्रींगुरुभ्यो
येवषट्। ॐक्लींगंवक्त्रायहुं। ॐग्लौंगौंनेत्रत्रयायवौषट्। ॐगांगाः अस्त्रायफट्। इतिषडंग
मंत्रानंगुष्ठादितलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वविन्यसेत्। ततोब्रह्मरंध्रेॐनमः।
दक्षश्रोत्रेश्रींनमः। वामेह्रीं। दक्षनेत्रेक्लीं। वामेग्लौं। दक्षनासायांगं। वामनासायांगां।
मुखेगं। दक्षबाहुमूलेयंमध्येनंमणिबंधेयें। अंगुलिमूलेबं। वामबाहुमूलेरंत
न्मध्येवं। मणिबंधेरं। अंगुलिमूलेदं। दक्षोरौसं। दक्षजानुनिवं। दक्षगुल्फेजं। दक्षपादांगुलि
मूलेरं। वामोरौमें। वामजानुनिबं। वामगुल्फेशं। वामपादांगुलिमूलेमां। अनाहतेनं।

जानुपादांगुलिपूरेयांस्वाधिष्ठानेस्वां। मूलाधारेलं। शिरसि। ॐ मुरवेश्रीं हृदयंक्लीं। गुदे क्लीं। पादयोः क्लैं। हृदयेगं नमः इतिविन्यस्यगणपतये हृदयादिद्वाविंशतिवर्णैः मूर्धादिपादांतं व्यापकंकृत्वा। मुरवेश्रींश्रीपतिभ्यांनमः। हृदिंक्लीं गोपीपतिभ्यां। गुह्ये ॐ क्लीं रतिकामाभ्यां। पादयोः ॐ ह्रौं महीवराहाभ्यां। मुरवे ॐ गं जामोदसिद्धिभ्यां। हृदि ॐ गं प्रमोदसमृद्धिभ्यां। गुह्ये ॐ गं सुमुरवकांतिभ्यां पादयोः ॐ गं दुर्मुरवमदनाशनीभ्यां। हृदि गं विघ्नमर्दवाभ्यां। जानुनि गं। विघ्नकर्तृद्रविणीभ्यां नमः। इतिविन्यस्य ध्यानंकुर्यात्। यथा। इक्षवेजलाधौद्वीपेनवरत्नमयेशुभे। तत्ररंगत्सतोयेद्वैतिशांततलेमले। तत्पोपकरणसंपूर्णगंधवाहनिषेविते। कल्पपादपसंशोभिभृंगसमलंगते। नानाकुसुमसंकीर्णनानापक्षि

विराजिते। अनेकफलसंकीर्णसेविनेचाप्सरोगणैः। उद्यद्दालातरोद्योतचंद्रज्योत्स्नासमाकुले। विलसद्यागीयकुट्टिमाकीर्णभूतले। कल्पपादपपुष्पस्रक्षट्पदस्वनमंजुले। पारिजातंकल्पतरुंतस्यमध्येविचिंतयेत्। युगपदनेषट्केनसेवितेपुष्पशोभितं। नवरत्नमपंतस्याधस्तात्सिंहासनंस्मरेत्। तन्मध्येपीपद्मंचषोडारंतस्यमध्यतः। कर्णिकार्यात्रिकोणंचतत्संस्थंचमहागणं। नानारत्नविभूषाढ्यमेकदंतंगजाननं। चिंतयेज्जत्रिरवानुगुणैक्षुजधनूरक्तोत्पलेसदृदांबीघग्रांत्रिंत बीजपूरकरदानकुंभंकरेबिभ्रतं। पद्मोद्यत्करपंजिनप्रभरुचाश्लिष्टं जगत्संनिभंस्वर्द्वंदुप्रभनेमहागणपतिंनेत्रत्रयोद्भासितं। पुष्करोद्धृतरत्नौघमयकुंभमुरवस्रुतान्। मणिमुक्ताप्रवालादीन्वर्षंतंधारयामुहुः। सर्वतःसाधकस्याग्नेस्वदानजलतोलुपां। षट्पदालीकर्णनालैर्वारयंतंमुहुर्मुहुः। अमरासुरसंसेव्यंसदृत्त

मुकुटोज्वलं। उन्मद्गजमुरवंनानानरएनूषितं। इतिध्यात्वागणपतिंपंचजेसर्वो
पचारैः। ऊर्ध्वयोश्चक्रकाबुंतदूधः। मूलपाशोतदधोधनुःसलेतदधोगदाज्रीसएतद
धोबीजपूरंदक्षोरुजग्रेरत्नकुंभः। इतिध्यात्वायथाशक्ति जपंविधायजपानंतरंषडंग
न्यासंकृत्वाजपंदेवायसमर्पएमेत्। केचिन्मुगणपतयेइतिपदस्यचतुर्थ्यंविहा
यगणपतेइतिसंबुध्यंतंपदंवदंतिनदायेसतविशेषःक्षोमंत्रेविरवलि। अत्रयथोपदे
शंजपादिकंकार्यमिति। इतिमहागणपतिमंत्रः। अथत्रैलोक्यमोहनमंत्रः। वक्रतुंडैकद
ष्ट्रायक्लीं ह्रीं श्रीं गंगणपतिवरवरदसर्वजनंमेवशमानायस्वाहा। इतिमंत्रस्त्रिंशद
क्षरोमंत्रेणप्राणायामत्रयंकृत्वा। शिरसि। ॐगंणकायऋषयेनमोमुखे। गाय
त्रीछंदसे। हृदये। ॐत्रैलोक्यमोहनायगणपतयेदेवतायेइतिऋष्यादिकंविन्यस्य
ममाभिष्टसिद्धयेविनियोगइतिकृतांजलिर्वदेत्। ततः वक्रतुंडैकदंष्ट्रायक्लीं ह्रीं श्री
दयायनमः। गंगणपतिशिरसेस्वाहा। वरवरदशिखायैवषट्। सर्वजनकवचायहुं। मेव

मेवशमानयनेत्रायवौषट्। स्वाहाअस्त्रायफट्। इतिषडंगमंत्रानंगुष्ठादितलांतंकर
योर्विन्यस्यहृदयादिषडंगेष्वपिविन्यस्यध्यानंकुर्यात्। यथा। रक्तवेजलधौद्वीपेइ
त्यादिमहागणेशवत्। इतिध्यात्वाजपंकृत्वासपर्य्यश्रीगुरुदेवंप्रणमेत्। इतित्रैलोक्य
मोहनगणेशः। अथद्वादशाक्षरः। शक्तिरूढंनिजंबीजंमहागणपतिंवदेत्। डेतम
न्निवधूःप्रोक्तोमंत्रोयंद्वादशाक्षरः। अस्यपुरश्चरणंलक्षजपः। क्लीं गंक्लीं महागण
पतयेस्वाहा। इतिमंत्रेणप्राणायामत्रयंकृत्वाशिरसिगणकायऋषयेनमः। मुखे
निचृद्गायत्रीछंदसेहृदयेश्रीशक्तिगणेशायदेवतायेनमः। इतिविन्यस्यममसर्वाभी
ष्टसिद्धयेजपेविनियोगः। जलिंकृतांजलिंकृत्वाक्लीं हृदयायनमः। गंशिरसेस्वाहा।
क्लीं शिखायैवषट्। महागणपतयेकवचायहुं। स्वाहानेत्रायवौषट्। समस्तमंत्रेण

स्त्रायफडिति करषडंगन्यासं विधाय ध्यानं कुर्यात्। यथा। मुक्ताचंद्रोद्यदीप्तांशुशिरकल
धरं नालनेत्रं मनोज्ञं हंसांभोजैर्धानं सरसिरुहसृणीरत्नपात्रं विशालं। स्वीयक्रोड
स्थिरायाध्वजनिहितलसच्चारुपाणेः प्रियायाश्चौन्विन्यस्यहस्तं मणिगणमुकुटं
संश्रयेन्नागवक्त्रं। दक्षाधःकरपर्यंतं वामाधःकरपर्यंतं सरसिजादिध्यानं। एवं ध्या
त्वा यथाशक्ति जपेत्तत्तदेवायसमर्पयेत्। इति द्वादशाक्षरः शक्तिगणेशः॥ ॥ शक्ति
ऊं निर्मं बीजं वशमानय ठद्वयं। तारः कौ मनुरग्न्यातोरुसंख्याक्षरो मनुः। लक्षत्रयं
जपेन्मंत्रीसादि। शक्तिगणेशऊं क्लीं गं ह्रीं वशमानयस्वाहायितिमंत्रेणप्राणायामंच
पंचलवा द्वादशाक्षरमंत्रोक्तान्मुन्यादीन्विन्यस्य। ऊं हृदयायनमः। क्लीं गं ह्रीं शिरसे
स्वाहा। वशं शिखायैवषट्। आनयकवचायहुं। स्वाहा नेत्रायवौषट्। सप्तमंत्रेण
णास्त्रायफट्। इति षडंगमंत्रानंगुष्ठादिकनिष्ठिकांतकरयोर्विन्यस्य हृदयादि

षडंगेषु विन्यसेत्। ध्यानं। यथा। वंधूकानेत्रिनेत्रंशशिधरमुकुटं नीललोलंगवोशं
नागास्यं धारयंतं गुणमणिवरदनिक्षुदंडं करायैः। शुंजन्मत्तद्विरेफाकुलमदनगुदम्लेशा
मलाभ्यां पार्श्वाश्लिष्टांगिस्यात्तदितरकमलयोन्यावयंदेववंद्यो वामेहस्तारविंद
वामाधःकरपर्यंतमायुधध्यानं। इतिध्यात्वा जपंचलवासमर्पयेत्। इयंकादशाक्षरः शक्तिगणे
शः॥

अथहरिद्रागणेशः। ऊं हुं गंग्लौंहरिद्रागणपतयेवरवरदसर्वजनहृदयंस्तंभयस्वाहा। इति
द्वात्रिंशदक्षरमूलमंत्रेणप्राणायामंत्रयंकृत्वा। शिरसिमदनायऋषयेनमः। मुखेअ
नुष्टुप्छंदसेहृदयेहरिद्रागणपतयेवरवरदेवतायैनमइतिविन्यस्यममसर्वभीचसि
द्ध्येविनियोगइतिकृत्वाजलिस्थकागांगीमित्यादिनाग्लौंग्लीमित्यादिनावाकरषडंग
न्यासंविधायध्यायेत्। यथा। स्वस्थानेपूर्वसरितेमणिमयेसिंहासनेसंस्थितंपीतपीत

विभूषणांबरलसन्मालयादिसंशोभितं। विघ्नेशंतिमुखंत्रिनेत्रलसितंहस्तैर्वहंतंजपेपाशं
सशरेक्षुवरंसृणियुतंक्रोधास्यतंत्राभये। वामोर्ध्वादिकरत्रयआद्यत्रयंदक्षोर्ध्वादित्र
येऽन्यत्रयमित्यायुधध्यानं। क्रोधमुद्रामुद्दहः। एवंसंचिंत्यजपंकृत्वासमर्पयेत्। इति
हरिद्रागणपतिमंत्रः।

अथवक्रतुंडगणेशमंत्रः। वक्रतुंडायहुं। इतिषडक्षरमंत्रेणप्रा
णायामत्रयंकृत्वा। शिरसिमार्गवायऋषयेनमः। मुखेअनुष्टुप्छंदसेनमः। हृदये
वक्रतुंडायदेवतायैनमः। इतिविन्यस्य। वंहृदयायनमः। क्रंशिरसेस्वाहा। तुंशिखायैवष
ट्। हुंअस्त्रायफट्। इतिषडंगमंत्रानंगुष्ठादितलांतंकरयोर्विन्यस्यहृदयादिषडंगेष
विविन्यस्यध्यानंकुर्यात्। यथा। रम्योद्विनारणतरमणिजातसंशोभिकांतिंसंविभ्रा
णंकरकिसलयैःपाशमप्यंकुशाढ्यं। सालीनिष्ठंत्रिनयनयुतंरक्तमाल्यांशुकाढ्यंभजे ९०

जोत्थद्मुलटगतमभुंसंस्मरेद्वक्रतुंडं। वामाधूर्ध्वयोरायेतदाद्यधस्त्रयोरन्येइत्यायुधध्यानं।
इतिध्यानंइतिध्यात्वायथाशक्तिजपंविधायसमर्पयेत्। अत्रकेचिद्गमितिदीर्घंपठंति। अ
थयथागुरूपदेशंजपादिकंकार्यं। इतिवक्रतुंडगणेशमंत्रः।

द्वितीयःषडक्षरोवक्रतुंडमंत्रः। मिघोकूय
स्वाहा। इतिमूलमंत्रेणप्राणायामत्रयंकृत्वा। शिरसिमार्गवायऋषयेनमः। मुखेअनुष्टुप्
छंदसेनमः। हृदयेवक्रतुंडायदेवतायैनमइतिविन्यस्यषडृंमंत्रवर्णैःषडंगानिकुर्यात्
ध्यानादिकंपूर्वोक्तमंत्रवदेव। इतितृतीयोवक्रतुंडमंत्रः।

अथाथर्वणिकोमंत्रो। द्वात्रिंशदक्षरः। रा
यस्पोषस्यधृतयेनिधीरलंदीमनः। रक्षाहणोचोवलाहनोवक्रतुंडायहुं। अधिध्याना
दिकंपूर्वोक्तमंत्रवदेवषडक्षरवत्। इत्याथर्वणिकोमंत्रः। अथोद्विषड्गणेशमंत्रः।

स्वाहा॰ इतिनवाक्षरमंत्रेणाजाएगायमत्रयं कृत्वा। शिरसिब्रह्मलोलायनमः। मुखेविराट्छंदसेनमः। हृदयेउच्चिष्टगणपतयेदेवतायेनमः। इतिविन्यस्य। हस्तिहृदयायनमः। पिशाचि शिरसेस्वाहा। लिखेशिखायैवषट्। स्वाहाकवचायहुं। समस्तेनस्त्रमाख्यातंकुर्यांगविधिरितः। ध्यानंतुपूर्वोक्तवक्रतुंडषडक्षरमंत्रवत्। अथास्यैवंमंत्रस्यनेदः। ॐक्रांक्रींक्रौंहुंघेघेफट्स्वाहा। इत्येकोदशवर्णात्मकोमंत्रः।

अस्यतुसप्यादिकंपुरश्चरणंध्यानादिकंवक्रतुंडषडक्षरमंत्रवत्।
एकदंष्ट्रायहस्तिमुखायलंबोदरायउच्चिष्टजानवेक्रौंक्रींहुंघेघेस्वाहा। इत्येकोनत्रिंशद्वर्णात्मकोमंत्रः। ~~अस्यतुसप्यादिकंपुरश्चरणंध्यानादिकंवक्रतुंडषडक्षरमंत्रवत्। एकदंष्ट्रायहस्तिमुखायलंबोदरायउच्चिष्टजानवेसविध्यानादिवक्रतुंडषडक्षरवत्।~~ ॐनमोभगवतेएकदंष्ट्राय

हस्तिमुखायलंबोदर्यैरोउच्चिष्टायमहाजानवेक्रौंक्रींहुंघेघेस्वाहा। अयमष्टत्रिंशद्वर्णात्मकोमंत्रः। सप्यादिकंपुरश्चरणंषड्भिर्लक्षैर्जपादिरितः। ध्यानंपूर्वोक्तवक्रतुंडषडक्षरमंत्रवद्देयं। षट्बीजैरिति। क्रौंहृदयायनमः। क्रींशिरसे। हुंकवचं। घेंनेत्रं। घेंअस्त्रं। इत्युच्चिष्टगणपतेरंगमंत्राश्चत्वारः॥ इतिमंत्रचंद्रिकायांप्रथमप्रकारः॥ इतिलिंगएपतिमंत्रप्रकरणं। अथशक्तिमंत्राः। तत्रादौमातृकासरस्वती। अकाराद्दक्षकारांतरूपंपंचाशद्वर्णसमुदायोमंत्रः। तेनैवषडंगन्यासंकृत्वाशिरसिब्रह्मलोलायनमः। मुखेगायत्रीछंदसेनमः। हृदयेश्रीमातृकासरस्वतीदेवतायेनमः। गुह्ये। हलभ्योबीजेभ्योनमः। पादयोःस्वरेभ्यःशक्तिभ्योनमः। नाभौसकलेकीलकायनमः। मातृकान्यासेविनियोगइतिकृतांजलिरुक्त्वा। अंकंखंआंहृदयायनमः। इंचंछंईंशिरसेस्वाहा। उंटंठंऊंशिखायैवषट्। एंतंथंऐंकवचायहुं। ओंपंफंओंनेत्रत्रयायवौषट्। अंयंरंअः अस्त्रायफडिति षडंगमंत्रानंगुष्ठादितलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिन्यसेत्। अथध्यानं। चंद्रार्द्धवि

तशोरवरांत्रिनयनांपंचाशद्वर्णिकमाक्षमालांगीशरदींदुकुंदरुचिरांवक्षोजभारानतां। दानंचास्तव
टीसुधारसलसत्कुंभंशुभंपुस्तकंविद्याणंकरपंकजैर्दधतीपद्मासनस्थांस्मरेत्। इति
धःकुरादिवामोध्वःकरांतंमायुधध्यानं। दानंवरं। इतिध्यात्वायथाशक्तिजपंकृत्वाजपानंतरं क
रषडंगंन्यासंकृत्वाजपंसमर्पयेत्। इतिमातृकासरस्वती। अथवाग्वादिनीमंत्रः। ॐऐं
वदवदवाग्वादिनीस्वाहा। इतिद्वादशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा। शिरसिकवायनमः
येनमः। मुखेविराट्छंदसे। हृदिश्रीसरस्वतीदेवतायै। गुह्येहल्लेखाबीजेभ्योनमः। पादयो
स्वरेभ्यःशक्तिभ्योनमः। नाभौव्यक्तयेकीलकायनमइतिविन्यस्यमममसर्वाभीष्टसिद्धि
र्थेविनियोगइतिकरांजलिंकृत्वा। अंकं४ आंहृदयायनमइत्यादिभ्रांवन्मातृकोक्तषडं
गंकृत्वा। यद्वा। ह्रांवदस्त्रंवेदहृदयायनमः। ह्रींवदयजुर्वेदायशिरसेस्वाहा। ह्रूंवदसामवेद



शिखायैवषट्। ह्रैंवदिनिअथर्ववेदकवचायहुं। ह्रौंस्वाहाषडंगनेत्रायवौषट्। ह्रःसमस्तमं
त्रमुक्तापुराणंन्यायमीमांसाधर्मशास्त्रेतिहासकल्पनाथानाशंसीअस्त्रायफट्। इति
षडंगमंत्रानंगुष्ठादितलांतंकरयोर्विन्यस्यहृदयादिष्वपिविन्यस्यध्यायेत्। यथो। कुं
देंदुरूपसितसोजगतेंदुमौलिःसल्लेखनीकरसरोजयुगेनविद्यां। संबिभ्रतीकुचभ
रानमितांगयष्टिर्वाग्देवतानवतुनःसततंविभूत्यै। दक्षेलेखनीवामेपुस्तकंइतिध्या
त्वायथाशक्तिजपंकृत्वाजपानंतरंकरषडंगंन्यासंकृत्वाजपंदेव्यैसमर्पयेत्। इति
वाग्वादिनीमंत्रः। हृदयंमेभगवतीवदशब्दयुगंततः। वाग्वादिवन्हिजायांतंवाग्भवाद्यं
समुद्धरेत्। हविष्याशीजपेन्मंत्रंवसुलक्षमनन्यधीः। तारोमायाधरोविंदुःशक्ति
स्मारःसरस्वती। उंतातानसंतिकोमंत्रःप्रोक्तएकादशाक्षरः। जपेदेकादशलक्षा
णि

अथहंसवाग्गीश्वरीमंत्रः।ॐह्रींह्रींॐसरस्वत्यैनमः।इत्येकादशाक्षरमंत्रेणप्राणायाम
मंत्रयंकृत्वाशिरसिशक्तिऋषयेनमः।मुखेगायत्रीछंदसेहृदिहंसवाग्गीश्वर्यैदेवतायै
नमइतिविन्यस्यममसर्वाभीष्टसिद्ध्यैविनियोगइतिकृतांजलिरुक्त्वाहृदयाय
नमः।ह्रींशिरसेस्वाहा।ह्रींशिखायैवषट्।ह्रींकवचायहुं।ह्रींनेत्रत्रयायवौषट्।ह्रींअस्त्रा
यफट्।इतिषडंगन्यासविधाय।ब्रह्मरंध्रेॐनमः।भ्रूमध्येह्रींदक्षनेत्रेॐ।वामनेत्रेह्रीं।
दक्षकर्णेॐवामकर्णेसं।दक्षनासायांरं।वामनासायांस्वं।मुखेत्यै।लिंगेनमः।पायौ
मः।इतिविन्यस्यध्यानंकुर्यात्।यथा।ध्यायेद्वाग्देवतांतामलकमलगांरम्यहंसाधि
रूढांकर्पूरक्षोदकुंदव्रजहरहसितप्रोल्लसंदेहकांतिंपीयूषांचश्वर्दमौलिंसकलरा
शिमुखींमंदहास्यामलास्यांविद्यावीणासुघोषकलशजपवरीहस्तपद्मैर्वहंतीं।
वामाद्यूर्ध्वोरुचेतदाद्यघःस्थयोरन्येहस्तयोःपुस्तकध्यानं।इतिध्यात्वायथाशक्तिजपं

जपंकृत्वाजपानंतरंपुनःकरषडंगन्यासंकृत्वाजपंदेव्यैसमर्पयेत्।इतिहंसवाग्गीश्व
रीमंत्रः।

अथद्वितीयाहंसवाग्गीश्वरी।ह्रींनमः।भगवतीवरदवाग्देवीस्वाहा।इतिषोडशवर्ण
मंत्रेणप्राणायामंमंत्रयंकृत्वापूर्वोक्तहंसवाग्गीश्वरीवदृष्यादिकंकिन्यस्यहृदया
यनमः।नमःशिरसेस्वाहा।भगवतीशिखायैवषट्।वरदवरदकवचायहुं।वाग्देवीनेत्रत्र
यायवौषट्।स्वाहाअस्त्रायफडितिकरषडंगन्यासंविधायध्यायेत्।यथा।कुंदेंदु
भासुस्मितवेसनाशुक्लमाल्यानुलेपाव्यालंब्यांविद्यामृतकलशंवेणुमाल्यंवहंतीं।
हस्तांभोजैःसितकलमगाद्योतिचंद्रार्द्धमौलिंभूसैनोस्तुत्रिनयसुतापीनवक्षोज
आ।दक्षोर्ध्वकरमारभ्यदक्षाधःकरपर्यंतमायुधध्यानं।व्याख्यामुद्रेत्यानमुद्रा।इतिध्या
त्वायथाशक्तिजपंकृत्वाजपंदेव्यैसमर्पयेत्।इतिद्वितीयाहंसवाग्गीश्वरी।अथवाग्वा

दिन्यामंत्रऋषिं। वाचस्पतेमूलोनूयःप्लुवःप्लुरितिकीलकंभवेत्। वागाद्योमनुराख्यातोरुद्रसं
ख्याक्षरोमनुः। रुद्रलक्षंजपेन्मंत्रामेति। इतिएकादशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा। शि
रसिशक्तिसहितायेनमः। मुखेगायत्रीछंदसेहृदिश्रीवागीश्वर्यैदेवतायेनमः। इतिन्यस्या
दिकंविन्यस्य। हृंहृदयायनमः। वाचस्पतेशिरसेस्वाहा। अमृतेशिखायैवषट्। प्लुवः कवचा
यहुं। प्लुअस्त्रायफडितिविन्यस्यमूलेनकरयोर्व्यापकंकृत्वांगुष्ठादिकनिष्ठांतपंचांगुलि
षुहृदयादिअस्त्रांतानिहृदयायनमः शिरसेस्वाहेजातियुक्तानिनेत्रवर्जंविन्यसहृदयादि
पंचांगेष्वपिनेत्रवर्जंविन्यस्यध्यायेत्। यथा। पद्मस्थोकलमेयुगाक्षपुस्तकोद्यद्वस्तांब्जो
शशिमुकुटांचभालनेत्रां। मुक्तामांकुचनमितांमुनींद्रसेव्यां वाग्देवीभजतबुधाःकविख्
यातां। वामोर्ध्वादिक्रमाधः। करांतमायुधध्यानं। इतिध्यात्वायथाशक्तिजपंविधायजप
नंतरंपुनः। करांगन्यासंकृत्वाजपंदेव्यैसमर्पयेत्। इतिवाग्वादिन्याएकोमंत्रः। द्वादश

स्वरमुद्धृत्यविंदुनादविभूषितं। विंदुनादसमायुक्तंवह्निबीजंसमुद्धरेत्। षष्ठस्वरसमायुक्तंद्वितीयं
बीजमुद्धरेत्। चंद्रबीजंसमुद्धृत्यवर्णंयोजयेन्ततः। त्रयोदशस्वरारूढबिंदुनादविभूषितं। अ
स्मिमंत्रेबीजत्रयात्मके। प्रथमबीजेदेविध्यंवदेतिवाकू इतिदेइतिवालक्षत्रयंजपेदिति। अ
थद्वितीयोमंत्रः। वांरुंस्त्रोंइतित्र्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा। पूर्वोक्तवाग्वादिनीदशाक्षर
मंत्रेणचदृष्यादिकंविन्यस्य। वांहृदयायनमः। रुंशिरःस्त्रोंशिखा। वांकवचं। रुंनेत्रं। स्त्रोंअस्त्रा
इतिनमःस्वाहेत्यादिजातियुक्तंहृदयादिषडंगेष्वपिविन्यस्यध्यायेत्। यथा। मुक्ताहारलस
त्तनुःशशिकलासंशोभितश्छिरवाव्याख्यामक्षगुणंचरत्नकलशंविद्यांवहंतीकरैः। पीनो
न्नुंगकुचद्वयप्रविनमन्मध्यासिताज्वस्थितात्रैलोक्यप्रणतासदाभरतनोवाग्वामधीशाश्रि
यै। दक्षोर्ध्वाधःकरयोराद्येवामोर्ध्वाधःकरयोरन्त्येत्यायुधध्यानं। इतिध्यात्वायथाशक्तिजपंवि
धाय। जपानंतरंकरषडंगन्यासंविधाय। जपंदेव्यैसमर्पयेत्तनकेचित्तु। वाकूरुंस्त्रोंएवंमंत्र

वदंति। अन्ये तु वाक्स्थाने वाग्बीजं वदंति। तत्त्रयथा गुरूपदेशजपादेकं कार्यमिति वाग्वादि
न्यादिनीयोमंत्रः।
अथपारिजातसरस्वतिमंत्रः सप्राणबल्लेश्वरापुटितः हकारसकारेकारविंदुसयुक्तः सरस्वतीङ्ता
नति। ॐ ह्रीं ह्रैं स्त्रौं सरस्वत्यैनमः। पुरश्चरणंद्वादशलक्षंजपः। ॐ सरस्वत्यैनमः। इत्येकादशाक्षरमं
त्रेण प्राणायामत्रयंकृत्वा ऋष्यादिजपादिकंपूर्वोक्तहंसवाग्वीश्वरीवत्कुर्यात्। इतिपारिजात
सरस्वती। अथसप्तकोटिश्वरीमंत्रः। कमः चंडिकेसः कः। इतिसप्ताक्षरमंत्रेणप्राणायामत्र
यंकृत्वा। शिरसिब्रह्मर्षयेनमः। मुखेगायत्रीछंदसे। हृदयेसप्तकोटीश्वरीदेवतायैन
मायेतिविन्यस्य। वांचीभिस्यादिना करषडंगन्यासंकृत्वात्रिपुरावत्ध्यायेत्। सालंकारवक्ष
तैःपथाशक्तिजपंविधायजपानंतरंपुनःकरषडंगादिकंकृत्वाजपादिकंयेसमर्प्यप्रणमेत्।
इतिसप्तकोटिश्वरीमंत्रः। अथान्योवाग्वादिनीमंत्रः। ॐवदवदवाग्वादिनिक्लींक्लींब्लेंक्लींहि १५

मरुद्भ्योनमःकुरुसोः मोक्षंकुरुष्वॐ इत्येकोनत्रिंशदक्षरात्मकमंत्रेणप्राणायामत्रयंकृ
त्वा। पूर्वोक्तवाग्वादिनीवत्सर्वमस्यापिकल्पयेत्। प्रणवादिवाग्वादिन्यंतएकोनत्रिंशद्व
र्णः। मायादिकुर्वंतस्त्रयोदशाक्षरोन्यः। बालांनिमादिप्रणवांवः समाक्षरोऽपरः ए
वंमंत्रत्रयात्मकोमंत्रः। अस्यपृथक्कृत्वप्रयोजनंतु। श्रीशिवार्चनचंद्रिकायांमुक्तं। इति
वाग्वादीनिमंत्रः।
एवंसंक्षेपचतुरोमंत्रावादिन्याः। अथबालामंत्रः। ह्रैं क्लीं सौः। इतिऐंकारमंत्रेणप्राणा ५ ६
यामत्रयंकृत्वा। शिरसिश्रीदक्षिणमूर्तयेऋषयेनमः। मुखेपंक्तिछंदसेनमः। हृ
त्श्रीबालापेटेवतायैनमः। गुह्येह्रींबीजाय। पादयोःसौः शक्तये। नाभौक्लींकीलका
यनमः। इतिविन्यस्य। ममचतुर्विधपुरुषार्थसिद्धयेविनियोगइतिकृतांजलिरुक्त्वा। ह्रैं
हृदयायनमः। क्लीं शिरसेस्वाहा। सौः शिखायैवषट्। ऐंकवचायहुं। क्लींनेत्रत्रयायवौ०।

मोः अस्त्रायफडिति षडंगमंत्रान् गुरुष्टादिकनिष्ठिकांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यानं कुर्यात्। यथा। त्रिभङ्गसुरनिलाभधम्मिलामलपुष्पिणीब्रह्मरंध्रस्थरश्मिन्मुक्तालेखाविराजितां। मुक्तालेखालग्नरत्नतिलकांचितभालिकां। विश्वमुक्तावज्राढ्यचंद्रलेखाकिरीटिनीं। त्रिभङ्गसुरनीलाभनयनत्रयपराजितां। सूर्यभास्वन्मणिरत्नकुंडलालंकृतांपरां। मुक्ताकारस्फुरन्मुक्ताहारभूषणभूषितां। ग्रैवेयांगपत्रालिस्फुरत्कांतिविराजितां। गंगातरंगकर्पूरशुभ्रांबरविभूषितां। श्रीरत्नवल्लीसदृशबाहुवल्लीविराजितां। कंकणादिसद्भूषामणिबंधलसत्भां। प्रवालललितकारपाणिपल्लवशोभितां। वज्रवैडूर्यमुक्तालीमेखलांविमलप्रभां। रक्तोत्पलदलाकारपादपल्लवशोभितां। नक्षत्रमालासंकाशमुक्तामंजीरमंडितां। वामेनपाणिनैकेनपुस्तकंचापरेणतु। अभयंचप्रयच्छंतीसाधकायवरानने। अक्षमालांचवरदंदक्षपाणिद्वयेनहि। ध्यायंतीचिंतयेद्देवींवश्यसौ

भाग्यवर्धनीं। क्षीरकुंदेंदुधवलांप्रसन्नांसंस्मरेत्प्रिये। दक्षबाह्वोर्ध्वतस्तद्वद्योतमायुधधारिणीं। विधायैवं जपेन्मंत्रं लक्षं तत्तद्दशांशतः। कृत्वा षडंगं तत्पूर्वं मुखादिगुह्यादिगुह्यांतं मंत्रेणाजपंदेव्यैसमर्पयेत्। गुरुं देवतांचप्रणमेत्। इतिबालामंत्रः।

अथभैरवीमंत्रः। ह्सैं ह्सौं ह्सौं। इतित्र्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा। शिरसिदक्षिणमूर्त्तयेऋषयेनमः। मुखेपंक्तिछंदसेनमः। हृदयेत्रिपुरभैरवीदेवतायैनमइतिविन्यस्य। ह्सौंह्सैंमित्यादिनाकरषडंगंन्यासंकृत्वा। त्रिपुराबत्ध्यायेत्। अथवा। हृदयस्थारुणांभोजकर्णिकामध्यसंस्थितां। जपाकुसुमसंकाशामरुणांबरभूषणां। स्मितधौतमहामोहांत्रिनेत्रींचंद्रशेखरां। विश्वसौंदर्यसर्वस्वजन्मसागररूपिणीं। ब्रह्मजघनेत्रस्थदेशशिवाख्येमुंडमंडलैः। मंडितांगीमहादेवींमुक्तजपवटीधरां। पुस्तकालंकृतवरांवरदाभयधारिणीं। आनंदमधुरांदेवींमदाघूर्णितलोच

नां। रक्तांगरागसुभगां ध्यायेत्त्रिपुरभैरवीं। दक्षादूर्ध्वयोराद्येतदाद्यधस्थ्योरन्ये इ
त्यायुधध्यानं। इतिध्यात्वायथाशक्तिजपंविधायजपानंतरंपुनः करषडंगंन्यासंकृ
त्वाजपंदेव्यैसमर्पयेत्। अस्यवमंत्रस्यान्येबहवोभेदाः संतिवाग्भवादिबीजै
श्चपृथक्ध्यानादिकं चास्तितत्सर्वमस्मत्संहितामहाकुलार्णवादिभ्योवाचनचंद्रिकायांद्र
ष्टव्यं। ग्रंथेबाहुल्यभयादस्माभिस्तन्नलिखितं। इतिभैरवीमंत्रः।

अथवाऐंश्वरी। द्रांद्रींक्लींब्लूं
सः। इतिपंचाक्षरमंत्रेणप्राणायामत्रयंविधाय। शिरसिमहानायऋषयेनमः।मुखेगा
यत्रीछंदसेनमः। हृदिबाऐंश्वरीदेवतायैनमः। इतिविन्यस्य। द्रांहृदयायनमः। द्रींशिर
सेस्वाहा। क्लींशिखायैवषट्। ब्लूंकवचायहुं। सःनेत्रायवौषट्। समस्तमंत्रेणास्त्रा
यफडितिषडंगमंत्रानंगुष्ठादिकेकरतलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिवि १७
न्यस्यध्यानंकुर्यात्। यथा। उद्यद्वाक्पराभासांनानालंकारभूषितां। बंधूककुसुमाकार
रक्तवस्त्रांगरागिणीं। युक्तकोदंडपुष्पेषुविराजितभुजद्वयां। इतिध्यात्वायथाशक्तिंजपंवि
धाय। जपानंतरंपुनः करषडंगंकृत्वाजपंदेव्यैसमर्पयेत्। इतिवाऐंश्वरीमंत्रः।

अथकामेश्वरीमंत्रः। ह्रींक्लींऐंब्लूंस्त्रीं। इतिपंचाक्ष
रमंत्रेणप्राणायामत्रयंकृत्वा। शिरसेसंमोहनायऋषयेनमः।मुखेगायत्र्यैछंदसेनमः।
हृदयेश्रीपंचकामेश्वरीदेवतायैनमः। इतिऋष्यादिकंविन्यस्य। ह्रींहृदयनमः। क्लींशिरसेस्वा
हा। ऐंशिखायैवषट्। ब्लूंकवचायहुं। स्त्रींनेत्रायवौषट्। समस्तमंत्रेणास्त्रायफडितिषडंग
मंत्रानंगुष्ठादिकेकरतलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यस्यध्यानंकुर्यात्।
रक्तांरक्तदुकूलांगलेपनांरक्तभूषणां। पाशांकुशधनुर्बाणपुष्पकंचाक्षमालिकां। वरा
भीतीश्चदधतीत्रैलोक्यवशकारिणीं। पंचकामैः परिवृतां ध्यायेद्देवीं विचक्षणः। बामा
ध्वोर्योरायेतदाद्यधस्थ्योरन्येतदाद्यस्थ्योरितरे। इत्यायुधध्यानं। इतिध्यात्वायथाशक्तिजपं

विधायाऽस्यानेतरंपुनःकरषडंगन्यासंकृत्वाजपंदेव्यैसमर्पयेन्मनू। इतिपंचकामेश्वरी
मंत्रः।

अथराजमातंगीमंत्रः। ऐंह्रींश्रींॐनमोभगवतीश्रीमातंगेश्वरीसर्वजनमनोहरीस
र्वमुखराजिसर्वमुखरंजनिसर्वराजवशंकरीसर्वस्त्रीपुरुषवशंकरीसर्वदुष्टवशंकरी
र्वसत्ववशंकरीसर्वलोकममुकंमेवशमानयस्वाहा। इसद्वात्रिंशत्यक्षरमंत्रेणप्राणायाम
यंकृत्वा। शिरसिॐदक्षिणामूर्तिऋषयेनमः। मुखेगायत्रीछंदसेनमः। हृदयेश्रीमा
गेश्वरीदेवतायैनमः। इतिविन्यस्य। ममसर्वाभीष्टसिद्धयेविनियोगइतिकृतांजलिरु
क्त्वा। ऐंह्रींश्रींॐनमोभगवतीश्रीमातंगेश्वरीसर्वजनमनोहरीहृदयायनमः। सर्वमुख
राजिसर्वमुखरंजिनीशिरसेस्वाहा। सर्वराजवशंकरीसर्वस्त्रीपुरुषवशंकरीशिखायै।
सर्वदुष्टमृगवशंकरीसर्वसत्ववशंकरीकवचायहुं। सर्वलोकममुकंमेवशमानयनेत्रायवौ।

DR BHAU DAJI MEMORIAL

स्वाहाअस्त्रायफडितिषडंगमंत्रानंगुष्ठाद्यादितिकरतलांतंकरयोर्विन्यस्यहृदयादिषडंगेष
विन्यस्यध्यानंकुर्यात्। अमलोदधिमध्यस्थेरत्नद्वीपेमनोरमे। स्वर्णप्राकारसंवीतेमंडपेरत्न
निर्मितं। कदंबबिल्वकदंबैरकल्पवृक्षोपशोभिते। वेदिमध्येसुखासीनंरत्नसिंहासनेस्थि
तं। अष्टपत्रंमहापद्मंकेसरायंसकर्णिकंतन्मध्येचक्रिकोणंस्याद्दष्टपत्रंतदोबहिः।
पुनःषोडशपत्रंस्यात्तदाह्येस्याच्चतुर्दलेवेदास्त्रंसचतुर्द्वारंमंडलंप्रोक्तमुत्तमं। तस्यम
ध्येसुखासीनांस्यामवर्णांशुचिस्मितां। कदंबमालाभरणांपूजितांचसुरासुरैः।
प्रलंबालकसंयुक्तांचंद्रेखावतंसिकां। ललाटतिलकोपेतांमौक्तिकंहसितानना।
किंचित्स्वेदांबुमधुरललाटफलकोज्वलां। वल्लीतरंगमध्यांतांराजगाल्लीवि
राजितां। सर्वाभरणसंयुक्तांमुक्ताभरणसंयुतां। हारसंयुवीभूषितां। नानाम

णिगणोन्नद्धकटिसूत्रैरलंकृतां। वलयैरलंकृतचिते:केयूरैर्मणिनूषितै:। नूषितांदिभुजांबा
लांमदाघूर्णितलोचनां। आपीनमंडलानोगसुन्नतपयोधरां। प्रलंबकर्णनरणकर्णो
त्तंसविराजितां। तमालनीलांतरुणीमधुमतींमतंगिणीं। चतु:षष्टिकलारूपपार्श्वस्थां
शुकसारिकां। कोटिबालार्कसंकाशांजपाकुसुमसंनिभां। एवंवापीतवर्णांबाध्यायेन्मा
तंगिनींपरां। इतिध्यात्वायथाशक्तिजपंविधायजपानंतरंपुन:करषडंगन्यासंकृत्वागुह्याति
गुह्यगोप्त्रीतिमंत्रेणजपंदेव्यैसमर्पदेवीगुरुंचप्रणमेत्। इतिराजमातंगीणीमंत्र:।

अथान्योराजमातंगीमंत्र:।

ऐंक्लींसौ:ऐंक्लींश्रीॐनमोभगवतीश्रीमातंगेश्वरीसर्वजनमनोहरीसर्वमुखरंजनीक्लींह्रीं
श्रींसर्वराजवशंकरीसर्वस्त्रीपुरुषवशंकरीसर्वदुष्टमृगवशंकरीसर्वसत्ववशंकरीसर्वलो
कवशंकरीमनुक्रमेवशमानयेस्वाहा। श्रींह्रींऐंसौ:क्लींऐंइत्यनवयक्षराख्यमंत्रेणप्रा

१९

णायामत्रयंकृत्वा। शिरसिदक्षिणामूर्त्तिऋषयेनम:। मुखेगायत्रीछंदसेनम:। हृदिश्रीमातं
गेश्वर्यैदेवतायैनम:। इतिविन्यस्यममशीर्षसिद्ध्यैविनियोगइतिकृतांजलिरुक्त्वा। ऐंह्रींश्रीं
सर्वजनमनोहरीहृदयायनम:। सर्वमुखरंजनीशिरसेस्वाहा। २क्लींह्रींश्रींसर्वराजवशंकरीशि
खायैवषट्। २सर्वस्त्रीपुरुषवशंकरीकवचायहुं। २सर्वदुष्टवशंकरीनेत्रत्रयायवौषट्। सर्वस
त्ववशंकरीअस्त्रायफडितिषडंगमंत्रानंगुष्ठादिकनिष्ठिकांतंकरन्यस्यहृदयादिषडंगेष्व
पिविन्यस्यध्यानंकुर्यात्। यथाक्लींक्लींमितिषड्दीर्घनाजाकामबीजेनषडंगंकृत्वाध्या
येत्। यथा। अमृतमहोदधिमध्येरत्नद्वीपेसंकल्पवृक्षवने। मणिमयमंडपमध्येमणिम
यसिंहासनस्थांक्लीं। मातंगीमधुपूरणमुदितामाघूर्णमानेक्षिणांसंस्विद्यद्वदनांकदं

बकुसुमप्रोल्लासिसद्वैकक्षां। वीणांदधतीमकरांसुरक्तवसनांमापक्वबिंबाधरांकस्तूरीति
लकांशशांकमुकुटांसच्छत्रपत्रश्रुतिं। आपीनोन्नतशोभुराजविनमयन्मध्यंशु

कस्यामलांग्रैवेयांगदचारुहाररसनामंजीरसंशोभितां। नक्तोधंचरहस्यसंमितदृशांसं
तर्पयंतींमुधाध्यायेत्सार्वगतंतथाखिलकलारूपंशुकंभावयेत्। इतिध्यात्वायथाशक्तिजपं
विधायजपानंतरंकरषडंगन्यासंकृत्वाजपंदद्यात्। एवंसमर्पयेत्। इतिद्वितीयोराजमातंगीमं
त्रः।

अथतृतीयोराजमातंगीमंत्रः। प्रागुक्तसप्तदशीस्थक्षरेराजमातंगीमंत्रेसर्ववशंकरीतिपद
नंतरंसोः राज्यलक्ष्मीप्रदेइतिसप्तदशाक्षरातिसंयोज्यानंतरंसर्वलोकमनुकूलमेवारिवर्ग
वंपंचनवस्वक्षरोमंत्रोभवति। सप्तदिकंपूर्वोक्तमेवकृत्वा। आंहृदयायनमः। ईंशिरसि
स्वाहेत्यादिषडंगमंत्रः। ॐह्रींनमोब्रह्मश्रीराजितेराजपूजितेजपेविजयेमोहनीगांधा
रेत्रिभुवनवशंकरीसर्वस्त्रीपुरुषवशंकरीसुखदुःखेभयेवाक्रोंस्वाहा। इतिचतुःपंचा
शदक्षरमंत्रेणप्राणायामत्रयंकृत्वा। शिरसिअजायसषयेनमः। मुखेनिचृद्गायत्री

छंदसेनमः। हृदिश्रीराजमातंगीदेवतायेनमः। इतिऋष्यादिकंविन्यस्यांहृदयाय
नमः। क्रींशिरसेस्वाहेत्यादिनाकरषडंगन्यासंविधाय। ध्यानंपूर्वोक्तराजमातंगी
वत्कुर्यात्। यथाशक्तिजपंविधायजपांतेकरषडंगादिकंकृत्वाजपंदद्यैसमर्पयेत्। इतिचतुर्थोराजमातंगीमंत्रः।

अथपंचमः। तत्रपूर्वोक्तचतुःपंचादशाक्षरमंत्रस्य
त्रिभुवनशंकर्यैतेसर्वलोकवशंकरीतिपदंचोक्तासर्वस्त्रीपुरुषेत्यादिस्वाहांतंवरे
त्। आदिस्थंप्रणवंदूरीकुर्यात्। तेनैकाधिकषष्यक्षरोमंत्रोभवति। तेनमंत्रेणप्राणा
यामत्रयंकृत्वा। शिरसिदक्षिणामूर्तिऋषयेनमः। मुखेनिचृद्गायत्रीछंदसेनमः। हृ
दिश्रीगौरीदेवतायेनमः। इतिऋष्यादिकंविन्यस्यक्रींनमोब्रह्मश्रीराजितेराजपू
जितेहृदयायनमः। जपेविजपेमोहनीगांधारिशिरसेस्वाहा। त्रिभुवनवशंकरीशि

शिखायैवषट्। सर्वलोकवशंकरी कवचायहुं। सर्वस्त्रीपुरुषवशंकरीनेत्रायवौषट्। सुसुदुदुघेघे
वावंह्रींस्वाहाअस्त्रायफट्। इतिषडंगमंत्रानंगुष्ठादिकनिष्ठांतकरयोर्विन्यस्यहृदयादिषड
ंगेष्वपिविन्यस्यध्यानंकुर्यात्। यथा। अमृतकलशलिराजन्मौलिराबद्धपाशांकुशाक्षसू
त्रवराज्ज्वलंबंधुजीवाकाएंगौरीं। अमरनिकरवंद्यांत्रीक्षणांशोणलेपांशुकंकुसुम
युतास्यांसंपदेपार्वतीनः। इतिध्यात्वायथाशक्तिजपादिकंविधायजपानंतरंकरज
उंगंकृत्वा जपंदेव्यैसमर्पयेत्। इतिपंचमोमंत्रः।

।अथषष्ठः।ॐराजमुखीराजाग्निमुखिवशमम्मु
खिह्रींश्रींक्लींदेवदेविमहादेविदेवाधिदेविसर्वजनस्यमुखंममवशंकुरुकुरुस्वाहा०। इ
तिसप्तचत्वारिंशदक्षरात्मकमंत्रेणप्राणयामत्रयंकृत्वाशिरसिॐदक्षिणमूर्त्तिऋ
षयेनमः।मुखेगायत्रीछंदसेनमः। हृदयेश्रीमातंगेश्वरीदेवतायैनमः। इतिन्यस्यादिकं २१

विन्यस्य।ॐराजमुखिराजाग्निमुखिहृत्। वश्यमुखिह्रींश्रींक्लींदिक्षसे०देविदेविशिखा
यैनमःदेवीकवचायहुं। देवाधिदेविनेत्राय०सर्वजनमुखंममवशंकुरुकुरुस्वाहा।
अस्त्रायफट्०इतिषडंगमंत्रानंगुष्ठादिकरतलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिवि
न्यस्यपूर्वोक्तराशीसक्षरराजमातंगीकृत्वाध्यात्वायथाशक्तिजपंविधायजपानंत
रंकरषडंगान्यासंकृत्वाजपंदेव्यैसमर्पयेत्। इतिषष्ठः।

।अथसप्तमः।ह्रींनमोहिलिहिलिचंड
मातंगीनिस्वाहा। इतिपंचदशाक्षरमंत्रेणप्राणयामत्रयंकृत्वा।स्वध्यानषडंगादि
कंपूर्वोक्तराजमातंगीवत्कुर्यात्। इतिसप्तमोमंत्रः।

।अथाष्टमः।ऐंनमः।श्रीमातंगीअमोघेसस
वाहिनिममकर्णेअवतरअवतरसत्यंकथयकथयऐंह्रीश्रींक्लींनमः। इतिचतु

श्चत्वारिंशदक्षरात्मकमंत्रेणप्राणायामत्रयंकृत्वासंध्यानजपादिकंराजमातंगीवत्कुर्यात्।इत्यष्टमः।

अथनवमोमंत्रः।ऐंक्लींश्रींऐंक्लींसोः क्लींह्रींश्रींश्रीमातंगेश्वरीसर्ववशंकरीस्वाहा।इतित्रयोविंशत्यक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिदक्षिणमूर्तिऋषयेनमः।मुखेनिचृद्गायत्रीछंदसेनमः।हृदिश्रीमातंगेश्वरीदेवतायैनमः।इतिऋष्यादिकंविन्यस्यैंहृदयायनमः।क्लींशिरसेस्वाहा।सोः शिखायैवषट्।ऐंकवचायहुं।क्लींनेत्रायवौषट्।सोः अस्त्रायफडितिषडंगमंत्रानंगुष्ठादिकनिष्ठिकांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यसेत्।ध्यानंतुपूर्वोक्ताष्टनवाक्षरमंत्रवत्कुर्यात्।ततोयथाशक्तिजपंकृत्वाजपांतेषडंगादिकंविधायजपंदेव्यैसमर्पयेत्।इतिनवमः।

अथदशमोमंत्रः।कामिनीरंजनिस्वाहाः।इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वासिरसिसंमोहनायऋषयेनमः।मुखेनिचृच्छंदसेन

मः।हृदिसर्वसंमोहिनिदेवतायैनमः।इतिऋष्यादिकंविन्यस्यकामिनिहृदयायनमः।रंजनिशिरसेस्वाहा।स्वाहाशिखायैवषट्।कामिनिकवचायहुं।रंजनिनेत्रायवौषट्।स्वाहाअस्त्रायफडितिषडंगमंत्रानंगुष्ठादिकनिष्ठिकांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यस्यविन्यस्यध्यानंकुर्यात्।स्यामांगीवल्लकींदोर्भ्यांबिभ्रतीसुभूषणां।चंद्रावतंसेविविधांगातेमोहपत्नीजगत्।।इतिध्यात्वाजपंविधायषडंगंकृत्वाजपंदेव्यैसमर्पयेत्।इतिदशमः।

अथैकादशः।नमःउच्छिष्टचंडालिमातंगीसर्ववशंकरीस्वाहा।इत्येकोनविंशत्यक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिसंतुवरवेनारदायऋषयेनमः।मुखेनिचृद्गायत्रीछंदसेनमः।हृदेश्रीमातंगेश्वरीदेवतायैनमः।ममसर्वाभिष्टसिद्धयेविनियोगइतिकृत्वा।नमःहृदयायनमः।उच्छिष्टशिरसेस्वाहा।चंडालीशिखायैवौषट्।मातंगीकवचायहुं।सर्व

शंकरिनेत्रत्रयाय वषट्। स्वाहा अस्त्राय फट्। इति षडंगमंत्रानंगुष्ठादिकनिष्ठिकांतंकरयोर्विन्य
स्य हृदयादिषडंगेष्वपि विन्यसेत्। अथ ध्यानं। मातंगीं नवयावकारुचरणां प्रोल्लासिकल्हारशु
कांवीणोल्लासिकरांसमुन्नतकुचामुक्ताप्रवालावलिं॥ हृद्यांगीतशरत्कुंडलधरां
बिंबाधरांस्मितांमाकीर्णालकवेल्लिमध्यनयनां ध्यायेच्छुकस्यामलां॥ इति ध्यात्वा यथा
शक्ति जपंविधाय षडंगंकृत्वा जपंसमर्पयेत्। अस्येवमंत्रस्यनेदानाद्रिंक्लींश्रीमित्यादिरे
कः। क्लींह्रींश्रीमित्यादिरन्यः। क्लींमित्यादिरपरः। तेषुप्रथममंत्रस्यतुशिरसिसतुंबुरुनार
दायऋषयेनमः। इतरद्वयोर्मदनायऋषयेनमः। षडंगध्यानादिकमन्यत्सर्वंपूर्वोक्तैकै
विंशत्यक्षरमंत्रवद्वोद्धव्यं। इयमेकादशीमंत्रः।

अथैकादशीमंत्रः। ह्रींक्लींसौः नमः। उच्छिष्टचांडालीमा
तंगीसर्ववशंकरीस्वाहा। सौः क्लींह्रीं। इतिपंचविंशत्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा। शिरसि

दक्षिणामूर्तिऋषयेनमः। मुखेनिचृद्गायत्रीछंदसे। हरिश्रीमातंगेश्वर्यैदेवतायेनमइति
विन्यस्यनमममर्वांगेषुसीऽर्धपेविनियोगइतिकृतांजलिरुक्त्वा। ह्रींनमः हृदयाय। क्लींउच्छिष्ट
शिरसेस्वाहा। सौः चंडालीशिखायैवषट्। ह्रींमातंगीकवचायहुं। क्लींसर्ववशंकरीनेत्रत्रया
यवौषट्। सौः स्वाहा अस्त्राय फट्। इतिकरौजालेषडंगंविधाय ध्यायेत्। अंसेवेणीकुसुमनी
लिचयांचूलिकानीलचूतांमुक्तोर्णापृथुकुचनतांवल्लकीवादयंतीं। मात्र्यीमंतांमधुरवच
नांस्यामलांकोमलांगीमातंगींतांसकलफलदांसंततंभावयामी। इति ध्यात्वा यथाश
क्ति जपंविधायकरषडंगंकृत्वा जपंसमर्पयेत्। इतिद्वादशीराजमातंगीमंत्रः॥ इतिश्री
जनार्दनविरचितायांमंत्रवंद्रिकायांद्वितीयःप्रकाशः॥ ॥ अथचुवनेश्वरीमंत्रः। अथव
क्ष्येजगद्धात्रीमधुनाभुवनेश्वरीं। ब्रह्मादयोपिमांजप्त्वालिरेस्त्रियमतिं। नकुलीशोनिमास्त
ढोवामनेत्रार्धचंद्रवत्। बीजंतस्याःसमाख्यातंसेवितंसिद्धकौक्षिभिः। नकुलीहकारःस्वग्नि

रेफः वामनेत्रेईकारः अर्धचंद्रोनुस्वारः। प्रजपेन्मंत्रविन्मंत्रो द्वात्रिंशल्लक्षमानतः। ह्रींइत्येकाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिशक्तिऋषयेनमः। मुखेगायत्रीछंदसेनमः हृदेश्रीभुवनेश्वर्यैदेवतायेनमः। गुह्येहंबीजायनमः। पादयोःईंशक्तयेनाभौरंकीलकायनमइतिविन्यासंकृत्वाचतुर्विधपुरुषार्थसिद्धयेविनियोगइतिकृत्वाजलिस्थकाह्रींकीमित्यादिनाकरषडंगन्यासंविधायहृदयादिषडंगेष्वपिविन्यसेत्। अथध्यानं। उद्यद्दिवाकरसहस्रसमानकांतिं चित्सुरुचिरांशुकसंवृतांगीं। पद्मासनांत्रिनयनांचपाशांकुशवरोभयैः अलंकृतांचभुवनेशिमहंस्मितेलनमुखीं। कुचभारविनम्रांगलतांदेवींहृदिस्मरेत्। वामोर्ध्वकरादिवामाधःकरांतमायुधधरां। इतिध्यात्वायथाशक्तिजपंविधायजपांतेकरषडंगंकृत्वा। जपंदेव्यैसमर्पयेत्। इतिकोभुवनेश्वरीमंत्रः। अथद्वितीयः। वाग्भवंदेवभुवनेतारमाबीजत्रयात्मिका। मंत्रंसमुद्धरेन्मंत्रीत्रिवर्गफलसाधनः। विलक्षजपेन्मंत्रपायसंमपुराप्नुतैः। ह्रींक्लींश्रींइतित्र्यक्षरमंत्रेणप्राणायामत्र

यंकृत्वापूर्वोक्तैकाक्षरवत्ऋष्यादीन्विन्यस्य। ह्रींहृदयायनमः। ह्रींशिरसेस्वाहेत्यादिनाकरषडंगन्यासंविधायध्यानंकुर्यात्। यथा। बंधूकांशिनयनांयुतांशशिचंद्रार्धमौलिंदोर्भ्यांपूर्णविविधमणिश्रीरत्नपात्रंवहंतीं। पद्मंसोम्यामुरुकुचयुगांस्मेरवक्त्रेंदुबिंबांमंबोध्यायेद्दुणसुलसावरांभीतियुक्तांसदेवीं। इतिध्यात्वा। जपंकृत्वा। जपांतेकरषडंगंकृत्वा। जपंसमर्पयेत्। इतिद्वितियः।

अथतृतीयः। अनंतोबिंदुसंयुक्तोमायाब्रह्मातिसारवान्। पाशाद्यक्षरोमंत्रः ह्रींह्रींइतित्र्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा। एकाक्षरवदृष्यादिकंविन्यस्य। ह्रींहृदयायनमः। ह्रींशिरसेस्वाहा। ह्रींहुंह्रींशिखायैवषट्। ह्रींह्रैंह्रींकवचायहुं। ह्रींह्रौंह्रींनेत्रायवौषट्। इतिकरषडंगंन्यासंविधायध्यानंकुर्यात्। यथा। जंभोदरीतिमूर्तिंत्रिनयनलसितांपीनवक्षोजनम्रांहस्तांभोजैर्वहंतीवरदसरसिजेरक्त

पात्राभयेचनिशोरक्तांबुजास्थांशिशिरकरलसच्छेखरांहारभूषाविशदाधीशार्चितांकिंचि
जल्हृदिकृत्वेनास्वरामंविक्रांतां। दक्षाधःकरूमारभ्यवामाधःकरपर्यंतमायुधध्यानं। इतिध्या
त्वाजपांतेकरषडंगं विधायजपंदद्यात्समर्पयेत्। इतितृतीयोमंत्रः।
। अथचतुर्थः। फुल्लपद्मकाक्षरीवत्। ओंह्रीं
क्रोंइतिसप्ताक्षरमंत्रेणप्राणायामत्रयंकृत्वाएकाक्षरवत्। ऋष्यादिकंविन्यस्यह्रींक्रींमित्यादिना
करषडंगंन्यासंविधायध्यायेत्। यथा। अकुशंवरदोन्नयंकरैर्बिभ्रतींकमलसंस्थितां
परां। प्रोद्यद्भगणकांतिसंततनुंसंस्मेरवक्त्रांनुवनेश्वरींहृदिक्षोभ्रूधःकरयोराचवामक
रयोरन्योइत्यायुधंध्यात्वा जपांतेसंख्याहृतेविधायजपंसमर्पयेत्। इतिचतुर्थो
मंत्रः।
अथदुर्गामंत्राः। ॐह्रींदुंदुर्गायैनमः। ॐह्रींइत्यष्टाक्षरमंत्रस्यएषप्राणायामत्रयंकृ
त्वाशिरसि। ॐनारददाद्यृषयेनमः। मुखेगायत्रीछंदसे। हृदिश्रीदुर्गायैदेवतायैनम २५

इतिऋष्यादिकंविन्यस्यसमस्तवांछितसिद्धयेविनियोगइतिकृतांजलिरुक्त्वा। ॐह्रींदुं
दुर्गायैहृदयायनमः। ॐह्रींदुंदुर्गायैशिरसेस्वाहा। ॐह्रींदुंदुर्गायैशिखायैवषडित्या
दिनाकरषडंगंन्यासंकृत्वाध्यानंकुर्यात्। यथा। सिंहासनांमरकतद्युतिमिंदुचूडांरंवद्गुरिं
करतलैर्दधतींशरासं। नागंत्रिनेत्रलसितांभवदुःखहंत्रीं दुर्गांनमामिमहिषघ्नसुरा
तांगीं। वामाद्यूर्ध्वयोराद्येतदायूर्ध्वस्थयोरन्योइत्यायुधध्यानं। इतिध्यात्वायथाशक्ति
जपंविधायजपांतेकरषडंगंकृत्वाजपंदद्यात्समर्पयेत्। इतिदुर्गामंत्रः। अथमहिष
मर्दिनीदुर्गामंत्रः॥महिषमर्दिनीस्वाहा। इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वासि
रसिमार्कंडेयायऋषयेनमः। मुखेगायत्रीछंदसेनमः। हृदिश्रीमहिषमर्दिन्यैदेवता
यैनमः। इतिविन्यस्यसर्वाभीष्टसिद्धयेविनियोगइत्युक्त्वामहिषमर्दिनहुंफट्। हृद
यायनमः। महिषशत्रोशाधिहुंफट्शिरसेस्वाहा। महिषेहनयहनयहुंफट्शिखायैवषट्।

महिषंनहनेदिव्यास्त्रायहुंफट्।कवचायहुं।महिषसूदनिहुंफट्।अस्त्रायफट्।इतिपंचां
गमंत्रान्मूलमंत्रांश्चमृष्ट्वयोः पाण्योरंगुष्ठादिकनिष्ठिकांतास्वंगुलिषुविन्यस्येत्तरहितेषुत
दयादिपंचांगेषुचविन्यस्यध्यानंकुर्यात्।यथा।गात्रैरुद्यत्कलसन्निभैर्मतिमोलिंकुउल्व
मंडितां।नीलिमालविलोचनांमहिषोत्तुंगनिषेदुषीं।शंखचक्रकृपाणचेटरेकरैर्दधाणा
मुकुंदलकान्।तर्जनीमपिबिभ्रतींनिजबाहुभिःशशिशेखरां।दक्षादूर्ध्वयोरग्रेतद
धश्चयोरन्येतदाधः।स्थयोरपरेतदाधः स्थयोरितरे।इत्यायुधध्यानं।इतिध्या
त्वा।तर्जनीतर्जनीमुद्रामित्यर्थः।सातु।तर्जन्येककनिनीतूर्ध्वशोषाःसन्नमिता
स्त्रधः।मुद्रियंतर्जनीप्रोक्ता।ततोयथाशक्तिजपंविधायजपांतेपंचांगंविन्यस्य
जपंदेव्यैसमर्पयेत्।इतिमहिषमर्दिनीदुर्गामंत्रः।ॐदुर्गामंत्रः।

।अथजयदुर्गामंत्रः।तारोदुर्गेयु

D. BHAU DAJI MEMORIAL

युगंरक्षमंतंलोचनं।द्विभांताजयदुर्गेयंविद्यावेद्यादशाक्षरी।बालेलक्षंजपेन्मंत्रे
दशांशेजुहुयात्ततः।ॐदुर्गेदुर्गेरक्षणीस्वाहा।इतिदशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा।शि
रसिनारायणऋषयेनमः।मुखेविराट्छंदसेनमः।हृदिश्रीजयदुर्गायैदेवतायै।इतिऋष्यादिकंविन्य
स्यॐहृदयायनमः।दुर्गेशिरसेस्वाहा।दुर्गेशिखायैवषट्।रक्षणीकवचायहुं।स्वाहानेत्रा
यवौषट्।समस्तमंत्रेणअस्त्रायफट्।इतिषडंगमंत्रान्गुष्ठादिकनिष्ठिकांतंविन्यस्यहृदया
दिष्वपिविन्यस्यध्यानंकुर्यात्।यथा।जलदद्युतिमिंदुकिरीटांचक्रदरासिजःशरपद्मैः।
दधतीनयनत्रययुक्तांसिंहगतांप्रणमेजयदुर्गां।रुक्मत्रिशूलं।वामोर्ध्वादिवामाधःक्रांत
मायुधध्यानं।दक्षोर्ध्वादिदक्षार्धोतंवा।इतिध्यात्वायथाशक्तिजपंविधायजपांतेऋष्यादिकंवि
